अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।

मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ ९.१६ ॥

ahaṁ kraturahaṁ yajñaḥ svadhāhamahamauṣadham |
mantro'hamahamevājyamahamagnirahaṁ hutam || 9.16||

पिताहमस्य जगतो माता धाता पितामहः ।

वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥ ९.१७ ॥

pitāhamasya jagato mātā dhātā pitāmahaḥ |
vedyaṁ pavitramoṅkāra ṛksāma yajureva ca || 9.17||

गतिर्भर्ता प्रभुः साक्शी निवासः शरणं सुहृत् ।

प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥ ९.१८ ॥

gatirbhartā prabhuḥ sākśī nivāsaḥ śaraṇaṁ suhṛt |
prabhavaḥ pralayaḥ sthānaṁ nidhānaṁ bījamavyayam || 9.18||

तपाम्यहमहं वर्षं निगृण्हाम्युत्सृजामि च ।

अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ ९.१९ ॥

tapāmyahamahaṁ varṣaṁ nigṛṇhāmyutsṛjāmi ca |
amṛtaṁ caiva mṛtyuśca sadasaccāhamarjuna || 9.19||